र्म्योक्तस्य हेतोः साध्यसाधर्म्यात् तद्धर्मभावो दृष्टान्त उदाहरणम् वैधर्म्योक्तस्य हेतोः साध्यवैधर्म्यादतद्धर्मभावो दृष्टान्त उदाहरणम्। पूर्वस्मिन् दृष्टान्ते यौ तौ धर्मौ साध्यसाधनभूतौ पश्यति साध्येऽपि तयोः साध्यसाधनभावमनुमिनोतीति। उत्तरस्मिन् दृष्टान्ते ययोर्धर्मयोरेकस्याभावादितरस्याभावं पश्यति तयोरेकस्याभावादितरस्याभावं साध्ये अनुमिनोतीति, तदेतद्धेत्वाभासेषु न सम्भवतीत्यहेतवो हेत्वाभासाः तदिदं हेतूदाहरणयोः साधर्म्यं परमसूक्ष्मं दुःखबोधं पण्डितैरुपवेदनीयमिति" भाष्यम्। अन्यत्र च "वादिप्रतिवादिनोः संप्रतिपत्तिविषयोऽर्थो दृष्टान्तः। यथा पर्वतो वह्निमान् धूमात् महानसवदित्यादौ महानसो दृष्टान्तः। स द्विविधः साधर्म्यदृष्टान्तः वैधर्म्यदृष्टान्तः। आद्यः पर्वते वह्निसाधने धूमवत्त्वस्य हेतोर्महानसः। द्वितीयः तत्रैव धूमवत्त्वस्य हेतोर्महाह्रदः। ३अर्थालङ्कारभेदे अलङ्कारशब्दे ३८८ पृ० दृश्यम् "दृष्टान्तोऽत्र महार्णवः" माघः ४शास्त्रे ५मरणे च मेदि०

**दृष्टि** स्त्री दृश–भावे क्तिन्। १दर्शने चाक्षुषज्ञाने "नान्यादृष्ट्या चक्षुष्मतामनुपलम्भः" सां०सू०। अक्षिपटलशब्दे ४३पृ० अक्षिशब्दे ४५पृष्ठे च दृश्यम्। २ज्ञानमात्रे मेदि० "तथाप्येकतरदृष्ट्या एकतरसिद्धेर्नापलापः"। "विदितबन्धकारणस्य दृष्ट्या तद्रूपम्" सां०सू०। ३प्रकाशे च "न द्रष्टुर्दृष्टेर्विपरिलोपोऽस्ति" श्रुतिः। ग्रहदृष्टिभेदादिकं ग्रहदृष्टिशब्दे २७५२।५३ पृ० दृश्यम्। करणे क्तिन्। ४नेत्रे अमरः। "अस्रैस्तावन्मुहुरुपचितैर्दृष्टिरालुप्यते मे" मेघ० "दृष्टिर्गाढनिमीलिता न विकला नाभ्यन्तरे चञ्चला" मृच्छ० "दृष्ट्या प्रसादाममलया कुमारं प्रत्यग्रहीत्" रघुः "दृष्टा दृष्टिमधो ददाति" सा०द०।

**दृष्टिकृत्** त्रि० दृष्टिं करोति कृ–क्विप्। २दर्शके २स्थलपद्मे न० शब्दच०। तस्य शोभया लोकानां दृष्टिसम्पादकत्वात् तथात्वम्।

**दृष्टिकृत** न० दृष्टिर्लोकानां दृष्टिः कृता येन निष्ठान्तस्य परनिपातः। १स्थलपद्मे शब्दरत्नावली। २कृतदर्शने त्रि०।

**दृष्टिक्षेप** पु० दृष्टेः क्षेपः। १दृष्टिपाते।

**दृष्टिगत** पु० दृष्टिं गतः विषतया प्राप्तः। १नेत्रविषये। ७त०। २नेत्रगते रोगभेदे अक्षिपटलशब्दे ४३पृ० दृश्यम्।

**दृष्टिगुण** पु० दृष्ट्या गुण्यतेऽभ्यस्यतेऽत्र गुण–अभ्यासे आधारे अच्। १वाणादिलक्ष्ये शब्दमाला तस्य दृष्ट्यैव शरादिक्षेपणाभ्यासनात् तथात्वम् ६त०। २नेत्रगुणे रूपादौ।

**दृष्टिप** पु० दृष्टिं पिबति पा–क। देवगणभेदे "गणा देवाना मूष्मपाः सोमपाश्च, लोकाः सुयामास्तुषिता ब्रह्मकायाः। आभासुरा गन्धपा दृष्टिपाश्च" भा०आनु० १८अ०

**दृष्टिबन्धु** पु० दृष्टेर्नेत्रस्य बन्धुरिव साहाय्यापादनात्। १खद्योते शब्दर० अक्षिपटलशब्दे ४३ पृ० उक्तेन "खद्योतविस्फुलिङ्गाभामिति" सुश्रुतवाक्येन दृष्टेस्तत्तुल्यत्वस्योत्कीर्तनेन तस्य तत्साहाय्यापादकतया तथात्वम्।

**दृष्टिवाद** पु० हेमच० उक्ते पञ्चात्मके बौद्धानां वादरूपकथाभेदे "दृष्टिवादो द्वादशाङ्गी स्याद्गणिपिटकाह्वया। प्रतिकर्मसूत्रपूर्वानुयोगो पूर्वगतचूलिकाः। पञ्च स्युर्दृष्टिवादभेदाः पूर्वाणि चतुर्दशापि पूर्वगते"।

**दृष्टिविक्षेप** पु० दृष्टिस्तदेकदेशस्य विक्षेपः। १कटाक्षदर्शने हला० ६त०। २दृष्टिपाते ३दर्शनान्तराये च

**दृष्टिविभ्रम** दृष्टेर्विभ्रमः विलासभेदः। नेत्रविलासभेदे "विवर्तितभ्रूरियमद्य शिक्षते भयादकामापि हि दृष्टिविभ्रमम्" शकु० २दर्शनभ्रान्तौ च

**दृष्टिविष** पुंस्त्री दृष्टौ विषोऽस्य। १सर्पभेदे स्त्रियां जातित्वात् ङीष्। "दृष्टीविषैः सप्तशीर्षैर्गुप्तं भोगिभिरद्भुतैः" भा०व०२२४अ०। दृष्टीविषैरित्यत्र आर्षो दीर्घः। "ते चाब्रुवन् नहुषो घोररूपो दृष्टीविषस्तस्य बिभीम देव!" भा०उ० १५अ०।

**दृह** दृद्धौ भ्वा०पर०अक०सेट्। दर्हति अदर्हीत् ददर्ह। अयमिदित्त्व तत्र दृंहति अदृंहीत्। "तमेतैः स्तोमैः समदृंहन्" ताण्ड्य०ब्रा०४।५।८ इदित्त्वात् नलोपाभावः दृंह्यते दृंहितः "दिवं दृंह दृंहिता दृंहणेन" तैत्ति० २।८३।८ "दृंहणाय खनामसि" अथ० ६।१३६।१ अनिदितस्तु दृह्यते दृहितः इत्यादि।

**दॄ** भये भ्वा० पर० सक० सेट्। दरति अदारीत् घटा० णिच् दरयति। ददार दरीता दरिता। दीर्णः।

**दॄ** विदारे दिवा० पर०सक० सेट्। दीर्यति अदारीत्। ददार दरीता दरिता दीर्णः। [दरिता। दीर्णः। भगन्दरः

**दॄ** विदारे क्र्या०प्वा०पर०अक०सेट्। दृणाति अदारीत् दरीता

**दे** पालने भ्वा० आत्म०सक० अनिट्। दयते अदास्त ददे दाता दास्यते दात्रम् दत्तः।

**देय** त्रि०दा–कर्मणि यत्। १दातव्ये "स्वं कुटुम्बाविरोधेन देयं दारसुतादृते। नान्वये सति सर्वस्वं यच्चान्यस्मै प्रतिश्रुतम्"